दण्डम् Rāṣṭrau. 6. 5.

**अखण्डा** (a-khaṇḍā) *f.* **1A** name of the 12th day of Mārgaśīrṣa and the observances on that day व्रतभेदान् प्रवक्ष्यामि…अखण्डा द्वादशी चान्या PadmP. ii. 87. 2; **1B** name of the 12th day of Kārttika (also named उत्थानद्वादशी) चातुर्मास्यस्य कालस्य तूत्थानद्वादशी तु या। … अतः पवित्रकं तस्याम् … कार्यं क्रियापरैर्भक्त्या साखण्डा येन जायते PāraS. 12. 43 = PauṣkS. 30. 18; **1C** name of the 11th day of (Mārgaśīrṣa etc.) a Hindu month and the व्रत on that day मार्गशीर्षादिमासेषु द्वादशीषु नरोत्तम। व्रतं शुभमिदं कार्यमखण्डैकादशीव्रतम्। दशम्यां चैव नक्तं च एकादश्यामुपोषणम्। द्वादश्यामेकभुक्तं च अखण्डा इति कथ्यते SkandP. ii(5). 12. 23; **2** the lunar day which lasts for the whole day (from sunrise to sunset) सूर्यास्तमनपर्यन्तं यस्मिन् वारेऽपि या तिथिः। विद्यते सा त्वखण्डा स्यात् NāraS. 4. 37; सप्तमी…। यद्यखण्डा भवेत् सैव तदा ज्ञेया भवात्मिका BhaviP. 358B. 17 (ii(2). 7. 59)

**अखण्डाकार** (akhaṇḍākāra) *adj.* [*f.* -ā] whose form is unlimited ब्रह्माखण्डाकारम् NirvāU. 347. 12; PaiṅgU. 425. 14 (4. 11); तदाकाराकारिताखण्डाकारवृत्त्यात्मकसाक्षिचैतन्ये प्रपञ्चलयः MaṇḍBṛU. 2. 3 (350. 11); अखण्डाकाशरूपोऽस्मि ह्यखण्डाकारमस्म्यहम् MaitreU. 3(20); अखण्डाकारया वृत्त्या त्वज्ञाने बाधिते सति SarvaVeSāSaṁ. 799; अखण्डाकारचरमवृत्तेरेवाज्ञानविरोधित्वात् GuruCandr. iii. 30. 21.

**अखण्डाकारक** (akhaṇḍākāra-ka) *adj.* of the form of the unlimited one (i. e. Brahman) अखण्डाकारकं ज्ञानमाचख्युस्तन्निबर्हणम् VedāntSiSūMañ. 3. 32.

**अखण्डाकारज्ञान** (akhaṇḍākāra-jñāna) *n.* the knowledge of the form of the unlimited one (i. e. Brahman) एकं च तत् आतपत्रं च अखण्डाकारज्ञानम् LalitāTriBh. 270. 16 (*on* 8); 284. 6 (*on* 16); शुद्धब्रह्मरूपेणापि तद्बाधनस्वरूपयोग्ये अखण्डाकारज्ञाने तत्तथा GuruCandr. ii. 108. 19.

**अखण्डाकाररूप** (akhaṇḍākāra-rūpa) *adj.* [*f.* -ā] having an unlimited form देहे ज्ञानेन दीपिते बुद्धिरखण्डाकाररूपा यदा भवति तदा विद्वान् ब्रह्मज्ञानाग्निना कर्मबन्धं निर्दहेत् PaiṅgU. 425. 14 (4. 11)

**अखण्डाकारवृत्ति** (akhaṇḍākāra-vṛtti) *f.* mental modification of the form of the unlimited (i. e. Brahman) अखण्डाकारवृत्तिः सा चिदाभाससमन्विता। आत्माभिन्नं परं ब्रह्म विषयीकृत्य केवलम्। बाधते तद्गताज्ञानम् SarvaVeSāSaṁ. 798; प्रज्ञायामखण्डाकारवृत्तौ…परिपाकं नीतायाम् LalitāTriBh. 266. 10 (*on* 6); ज्ञानमेवाज्ञानध्वंस इति मते अज्ञानस्योपाधित्वासंभवात्…तस्या एवाखण्डाकारवृत्तित्वेन सर्वत्रोपधायकत्वात् GuruCandr. i. 127. 18.

**अखण्डाकाराकारित** (akhaṇḍākārākārita) *adj.* [*f.* -ā] which has attained a form which is the same as that of the unlimited one (i. e. Brahman) अहम्…ब्रह्मास्मीत्यखण्डाकाराकारिता चित्तवृत्तिरुदेति VedāntSā.(Sa.) 26. 10.

**अखण्डाकाश** (akhaṇḍākāśa) *m. n.* unlimited space अखण्डाकाशरूपोऽस्मि ह्यखण्डाकारमस्म्यहम् MaitreU. 3(20)

**अखण्डाकृति** (akhaṇḍākṛti) *adj.* of unlimited form गन्तव्यं किमिहास्ति सर्वपरिपूर्णस्याप्यखण्डाकृतेः Prauḍhā. 10.

**अखण्डाखण्डलधनुस्** (akhaṇḍākhaṇḍaladhanus) *n.* the unbroken (full) rain-bow अग्रे सोपानपङ्क्तीनामभूवन् रत्नतोरणाः। अखण्डाखण्डलधनुःश्रेणिश्रीसोदरा इव TriṣaŚaPuC. ii. 2. 289.

**अखण्डाखण्डलवैभव** (akhaṇḍākhaṇḍalavaibhava) *adj.* having unimpeded power as of Indra आनन्दरङ्गक्षितिपतिः … समागतानेकदेशवास्तव्यसमस्तानन्तभोगिभोगायतचण्डभुजदण्डमण्डिताखण्डाखण्डलवैभवविभवविनिर्जितयक्षराजक्षमाधिराजराजिविराजमानोत्तुङ्गानेकरत्ननिकुरुम्बप्रभातरङ्गितभद्रासनसहस्रसंकुलान्तरं मनोहरमधिगम्य विवाहमण्डपम् ĀnandRa. 5. 8(22)

**अखण्डाखण्डलश्रीक** (akhaṇḍākhaṇḍalaśrī-ka) *adj.* possessing the entire prosperity of Indra अखण्डाखण्डलश्रीकः … भूयादेष नामयनायकः EI. iv. 359. 41.

**अखण्डाख्य** (akhaṇḍākhya) *adj.* [*f.* -ā] named *akhaṇḍā* (a Tithi which lasts for three Muhūrtas after the sunset) उपैत्यस्तमवाप्यार्कमुहूर्तत्रयवाहिनी। या तिथिः स्यादखण्डाख्या VasiS. 12. 40.

**अखण्डाङ्ग** (akhaṇḍāṅga) *adj.* headless body (the limbs of which are not cut) अखण्डाङ्गं शवं देवि सखण्डं मस्तकेन यत्। तन्मुण्डं यन्त्रमालादिपात्रकर्मणि कीर्तितम् ŚaktiSaṁT. ii. 67. 10.

**अखण्डाज्ञ** (akhaṇḍājña) *adj.* whose orders are not violated अखण्डाज्ञस्य सर्वत्र सेव्यमानस्य पार्थिवैः। सुखेन व्यतिगच्छन्ति कश्चिदार्यस्य वासराः TriṣaŚaPuC. i. 5. 85; नन्दोऽभूदखण्डाज्ञस्ततः परम् PariPar. 6. 251.

**अखण्डात्मक** (akhaṇḍātma-ka) *adj.* of unlimited form उत्पन्ने च विरोध एकरसके वस्तुन्यखण्डात्मके। वृत्तिर्लक्षणया भवति SaṁkṣeŚā. 1. 196 (i. 154. 23)

**अखण्डात्मतत्त्व** (akhaṇḍātma-tattva) *n.* the real nature of the unlimited self तदप्यखण्डात्मतत्त्वस्य वाक्यार्थतामुपपादयद्भिरस्माभिरधस्तादेव निरस्तम् NyāyMa. 299. 7; अखण्डात्मतत्त्वरूपपरब्रह्मरूपेण…उक्तस्य रूपमेतत् GuruCandr. ii. 277. 13.

**अखण्डात्मन्** (akhaṇḍātman) *m.* the self which is one without a division यदि च सोऽखण्डात्मा, कुतो जगज्जीवेश्वरात्मकं द्वैतमवभासते SarvaMaSaṁ. 40. 12.

**अखण्डात्मप्रकरण** (akhaṇḍātma-prakaraṇa) *n.* the context dealing with the indivisible self इदं सर्वं यदयमात्मेत्यादेरखण्डात्मप्रकरणस्थस्य … अविरोधात् GuruCandr. ii. 289. 7.

**अखण्डात्मरूप** (akhaṇḍātma-rūpa) *n.* the form of the unlimited self तत्त्वमतः पूर्वं प्रेरकत्वेन पृथक्त्वेन च उपलभ्यमानमखण्डात्मरूपं मत्वा मुच्यते LaCandr. 431. 20.

**अखण्डात्मविमर्शतस्** (akhaṇḍātmavimarśa-tas) *adv.* through the contemplation of the self which is inseparable from everything परं तु ध्यानमुदितमखण्डात्मविमर्शतः। निर्वातदीपसङ्काशमात्मनात्मसमीक्षणात् TantrRā. 24. 22.

**अखण्डात्माद्वैत** (akhaṇḍātmādvaita) *n.* non-dual nature of the self which is unlimited वामदेवादिर्मुक्तोऽस्ति तथापीदानीं बन्धः स्वस्मिन्ननुभवसिद्धः। अतो नाखण्डात्माद्वैतमित्यर्थः SāṁkhyaPraBh. 72. 10 (*on* 1. 157); 131. 30 (*on* 5. 65)

**अखण्डादर** (akhaṇḍādara) *adj.* [*f.* -ā] which has unbounded respect राजिराखण्डलानामखण्डादरा पादपीठेऽलुठत्तावके ŚrīVīraSta. 10.

**अखण्डादर्शीय** (akhaṇḍādarśīya) *adj.* belonging to the book (called) Akhaṇḍādarśa (a work on Dharmaśāstra) अखण्डादर्शीये साक्षिप्रकरणे कात्यायनः-दत्तस्य जनकापत्ये मृते VyavaNi. 434. 9.

**अखण्डाद्वयानन्द** (akhaṇḍādvayānanda) *m.* bliss which is unlimited and without a second (i. e. difference) एतेन अखण्डाद्वयानन्दैकरसब्रह्मज्ञानमेव केवलज्ञानम्…इति वेदान्तिमतमपि निरस्तम् JñānBiPra. 23. 23.

**अखण्डाद्वितीयरूप** (akhaṇḍādvitīya-rūpa) *n.* the form which is unlimited and without a second (i. e. difference) भक्त्या प्रसन्नस्तु भगवान्स्वयमेव कृपया तच्चेतस्यखण्डाद्वितीयरूपेणाविर्भूतः स्वज्ञानेनाज्ञानं निवर्तयति VīraMi. (Bhakti.) 19. 10.

**अखण्डाद्वैत** (akhaṇḍādvaita) *n.* the non-dual nature of the unlimited (self) अद्वैतश्रुत्यनुपपत्तिं समाधायाखण्डाद्वैते बाधकान्तरमाह SāṁkhyaPraBh. 72. 6 (*on* 1. 157)

**अखण्डाद्वैतबुद्धि** (akhaṇḍādvaita-buddhi) *f.* knowledge of the non-dual (self) which is unlimited अखण्डाद्वैतबुद्ध्युपकारकत्वमेव भूतयोन्यादिवाक्यानाम् LaCandr. 828. 41.

**अखण्डानन्द** (akhaṇḍānanda) *adj.* consisting of unlimited bliss अखण्डानन्दमद्वयम्।…यत्परं ब्रह्माहमेव तत् ĀtmaBo. 36; अखण्डानन्दम्…यत्तत्त्वमसि परमं ब्रह्म न परः Jīvān. 309. 4; आम्नायानामप्यखण्डानन्दं ब्रह्मैव प्राधान्येन विषयः SetuBa. 20. 12; *m.* unlimited bliss किं हेयं किमुपादेयम्…अखण्डानन्दपीयूषपूर्णब्रह्ममहार्णवे AdhyāU. 66; कालशब्देन निर्दिष्टो ह्यखण्डानन्द अद्वयः AparoAnu. 111; खण्डानन्दा रसाः सर्वे सोऽखण्डानन्द उच्यते CaitaCa. 56. 19(3)

**अखण्डानन्दता** (akhaṇḍānanda-tā) *f.* the state of the unlimited bliss अर्थक्रियाहेतुरखण्डानन्दतयास्वादहेतुः आस्वादनीयेति यावत् ŚivārkaMaDī. ii. 492. 18 (*on* iv. 4. 14); सिद्धैवात्मनो दृढयोगसिद्धिरखण्डानन्दता च Jīvān. 320. 6.

**अखण्डानन्ददानतस्** (akhaṇḍānandadāna-tas) *adv.* because of giving unlimited bliss खण्डनात्सर्वदुःखानामखण्डानन्ददानतः स्वभावाद्दारुरेषो हि परं ब्रह्माभिधीयते SkandP. ii(2). 28. 40.

**अखण्डानन्ददायिन्** (akhaṇḍānanda-dāyin) *adj.* which bestows uninterrupted (i. e. continuous) joy अखण्डानन्ददायिनः…अनाहतस्य नादस्यानुसंधानेन भस्मितनिखिलकश्मलः NityoNi. 134. 16.

**अखण्डानन्दनाभिधान** (akhaṇḍānandanābhidhāna) *adj.* called or named as Akhaṇḍānandana (the last act of the drama Ḍamaruka, so called because of its giving uninterrupted delight) भो भो जितेन्द्रियसुकर्मसुमेधसः तूर्णमागच्छत निबन्धनममियोक्तुमखण्डानन्दनाभिधानम् Ḍamaru. 112(14)

**अखण्डानन्दपूर्ण** (akhaṇḍānanda-pūrṇa) *adj.* who is full of unlimited bliss तत्त्वमसीत्युपदेशेन त्वमेवाहमहमेव त्वमिति तारकयोगमार्गेणाखण्डानन्दपूर्णः कृतार्थो भवति MaṇḍBṛU. 3. 1. (351. 20); अखण्डानन्दपूर्णस्त्वममोघफलदायकः GaṇeP. ii. 38. 51.